अग्नेः पुरोहितत्वञ्च क्व दृष्टं येन कीर्त्यते।
ईळेशब्दप्रयोगश्च क्व दृष्टः श्रोत्रगोचरः॥

देवत्वञ्चास्य यज्ञस्य विहितं क्वोपलक्षितम्।
विधिनैव हि देवत्वं प्रति कर्मावधार्यते॥ - इति

इमे श्लोका निगदव्याख्याताः।

4 किञ्च सामवेदे खल्वासामृचाँ अग्नाई, आश, ऊश, इत्यादयो नानाविधा गीतयो विभिन्नकालिका नियताः सन्ति। गुरूपदेशमन्तरा तेषां स्वरूपं नैव शक्यमध्यवसातुम्। को नु खल्वमूढः पुरूषः एतासां गीतीनामुच्चारणव्यवस्थां लोके अदृष्टपूर्वां कल्पयेत्? किमर्थञ्च? तस्मात् वेदा अपौरूषेया इति ईश्वरनिर्मिता वा इत्यवश्यमभ्युपगन्तव्यम्। तथापि वेदेषु किमर्थमिदं वैचित्र्यमिति चेत्। लोकवत् - इत्युत्तरम्। लोको हि अचिन्त्य वैचित्र्यरचनात्मको दृष्टिगोचरः। नानाविधाकृतिगुणस्वभावचेष्टाविशिष्टाः पुरुषाः, स्त्रियः, पशुपक्षिमृगकीटादयो भूचरा जलचरा उभयचराश्च प्राणिनो रविचन्द्रनक्षत्रादीनि ज्योतींषि च वरीवृत्यन्ते। एतेषामियत्ता नैव मानुषेण शक्यावधारणा। किमर्थमेषा विचित्रा पदार्थसृष्टिरिति समानोऽनुयोगः। यथा पदार्थसृष्टिस्तथा पदानां पदघटित वाक्यानाञ्चेत्यवेहि। पदार्थे वैचित्र्यं प्रकृतेः स्वभावः, ईश्वरस्य लीला वेति चेत्। पदेष्वपि तदेव वैचित्र्यस्य समाधानमीक्ष्यताम्।

5 किञ्च - कश्यपविश्वामित्रादयो मन्त्रद्रष्टार इति सर्वत्र संस्मर्यते, नतु कर्तार इति। ‘‘ऋषिर्दर्शनात्’’ इति यास्काचार्यः। समाध्यवस्थायां कश्यपादिभिर्मन्त्रा दृष्टाः नतु रघुवंशादिकाव्यग्रन्थाः कविभिरिव कृताः। तस्माद्वेदो न मानुषनिर्मितः।

चक्षुःश्रोत्र-कर-चरण-दंष्ट्रा-पक्षत्यादिघटितं, तत्तच्छरीरनामकं महद्यन्त्रं निर्मितं, यथा च तज्जीविकायै व्रीहियवतृणाद्यन्नजातं कल्पितम्, तथा व्यवहारसिद्ध्यर्थमुपकाराय भूयसे भाषापि काचिदुपदिष्टेति किमनुपपन्नम्?

अत्र कश्चित्प्रत्यवतिष्ठेत। बाढमुपदिष्टा भवेदीश्वरेण काचन भाषा सा तु संस्कृतभाषैवेत्यत्र किं मानम्? इति।

सत्यम्। अवश्यमस्माभिः काचन भाषा मनुष्यजातेरुपकाराय परमेश्वरेणोपदिष्टेत्यूरीकर्तव्यम्। सा च प्राचीनतमा भवितुमर्हति, या सर्वशब्दसमृद्ध्या यथेष्टं, नूतन शब्दनिर्माणसामग्रया च संपुष्टा भवितुमर्हति। एवं किलेश्वरसृष्टिः भवत्युपकाराय मनुजानाम्। सा च संस्कृतभाषैव नान्या। ननु एसुक्रिस्तः, महम्मद्पैगम्बरश्च प्रवादिनौ हिब्रूभाषया, अरब्बीभाषया च ईश्वरेण सम्भाषितवन्ताविति तन्मतीया वदन्ति। तस्मात् तयोरपि देवभाषात्वं सम्मन्यतामिति चेत्। ईश्वरस्य सर्वज्ञत्वेन हिब्रूभाषादिज्ञानमस्त्येवेति नेदं भवति चोद्यम्। तयोः प्रवादिनोरर्वाचीनत्वेन तद्भाषयोः नैव प्राचीनतमत्वमस्ति न वा सर्वशब्दसमृद्धिः। न हीश्वरेण लोकोपकारप्रवृत्तेन न्यूनतादोषयुक्ता भाषा समुपदिश्यते। किञ्च तयोरपि भाषयोः संस्कृतजन्यत्वं शक्यं प्रतिपादयितुमिति न किञ्चिदेतत्। किञ्च यदि तौ प्रवादिनावुभावपीश्वरेण साक्षादुपदिष्टौ तर्हि कुतस्तदुपदेशयोर्भूयान्मतिभेदः? उभावपि मानुषावितिहासगोचरौ तत्तन्मतस्य प्रवर्तयितारावििति प्रसिद्धं लोके। नेयं कथा वेदेषु। अतिविस्तृतेष्वपि वेदेषूपनिषत्सु च एकवाक्यता वरीवर्ति। भूयांसश्च मन्त्रद्रष्टारः। यद्येते ऋषयः मन्त्रकर्तारोऽभविष्यन्, 'मुण्डे मुण्डे मतिर्भिन्ना' इति न्यायेन तदुपदेशा अपि नानात्वेन अभेत्स्यन्त। यदिदानीन्तनपरिशोधकवाचस्पतिभिर्वेदेष्वपि

तात्त्विकमतभेदो दृश्यत इत्याख्यायते, तत्सर्वं प्राचीनैरर्वाचीनैश्च भारतीयविपश्चद्भिर्दूषितमित्यन्यत्र स्पष्टमिति नेह तन्यते।

ये त्वीश्वरं नाभ्युपगच्छन्ति तेषामेवं भवति विचारसरणिः। आदौ मानवजातिरनागरिकी असंस्कृता बर्बरप्राया बभूव। क्रमेण मानवानां बुद्धिविकासोऽजनि। यदा विकासावस्थायामन्नवस्त्रगृहनिर्माणादयः क्रियाः प्रगतिपथं प्राप्नुवन् तदा व्यवहारसौकर्याय जनाः शब्दान् निर्माय विवक्षितार्थवोधनाय उपायुञ्जत। ततश्च काले गते शब्दैर्वाक्यरचना निरूपिता। लिपिश्च आविष्कृता। तदुपरि लेखनसामग्री। इत्येवं क्रमेण सर्वविधं वाङ्मय साहित्यं निर्मितम् - इति।

अत्र ब्रूमः। सर्वे जनाः सुखमपेक्षत इति लोकसिद्धमेतत्। सुखप्राप्त्यर्थमारभ्यमाणक्रियापि सुखावह्य भवेदिति स्वभाविकी मानवप्रवृत्तिः। व्यवह्मरसौकर्यार्थं निर्मीयमाणे शब्देऽपि सुखोच्चारणं कामयते मनुष्यः, न तु कण्ठाताल्वादिनिष्पीडनेन प्रभूतं क्लेशं सोढुम्। नखच्छेद्ये वस्तुनि न कोऽपि प्रेक्षावान् परशुना प्रहरति। न वा पादचारेण सुखप्राप्यं देशमश्वमारुह्य गच्छति। न च भूमौ लुठन् प्रयाति। अत्के चेन्मधुविन्देत किमर्थं पर्वतं व्रजेत् इति न्यायः सर्वत्र जागर्ति। एवं स्थिते किमर्थं जिह्वादिनिष्पीडनेन क्लिष्टोच्चारणान् शब्दान् निरमिमीत पुरुषः? वेदे संस्कृतभाषायाञ्च प्रयुज्यमानाः प्रभूताः शब्दा नैव सुखोच्चारणाः। मह्मप्रणानां ख.ध.छ. झ. प्रभृतीनामूष्मणाञ्चोच्चारणं कस्य सुखावहम्? तथा जिह्वामूलीयोपध्मानी ययोश्च। अननुरूपसंयुक्तहल्घाटितपदानाञ्च। जर्भरी, तुर्फरीतु, स्वच्छन्दोच्छलदच्छकच्छ, क्षपाःक्षपयति, हूर्च्छनम्, कात्स्र्न्यम् -

